# Rishi Agastyaproktam Shivalingapradakshinavidhyupadesham

# ઋષિ અગસ્ત્યપ્રોક્તં શિવલિઙ્ગપ્રદક્ષિણવિધ્યુપદેશમ્

## Document Information

Text title : Rishi Agastyaproktam Shivalingapradakshinavidhyupadesham

File name : shivalingapradakShiNavidhyupadesham.itx

Category : shiva, shivarahasya, upadesha, advice

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 26 kumbhaghoNamahimAnuvarNanam | 50-83||

Latest update : June 16, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 16, 2024

*sanskritdocuments.org*

# ઋષિ અગસ્ત્યપ્રોક્તં શિવલિઙ્ગપ્રદક્ષિણવિધ્યુપદેશમ્

(શિવરહસ્યાન્તર્ગતે ઉગ્રાખ્યે)

અગસ્ત્યઃ (ઉવાચ)

પ્રદક્ષિણવિધિં વક્ષ્યે શૃણુ સમ્યગ્દ્વિજોત્તમ ।
નમસ્કારવિધિં ચાત્ર વક્ષ્યે વૈદિકમાર્ગતઃ ॥ ૫૦॥

પ્રદક્ષિણપ્રકારસ્તુ દ્વિવિધો વેદસમ્મતઃ ।
સવ્યાપસવ્યઃ સવ્યશ્ચ તત્રાદ્યવિધિરુચ્યતે ॥ ૫૧॥

વૃષં ચણ્ડં વૃષં ચૈવ સોમસૂત્રં પુનર્વૃષમ્ ।
ચણ્ડં ચ સોમસૂત્રં ચ પુનશ્ચણ્ડં પુનર્વૃષમ ॥ ૫૨॥

એતત્પ્રદક્ષિણોક્તાનિ સ્થાનાનિ નવ સત્તમ ।
ન તાન્યુલ્લઙ્ઘનીયાનિ વેદમાર્ગરતૈર્દ્વિજૈઃ ॥ ૫૩॥

પ્રાગ્દ્વારે દેવદેવસ્ય વૃષસ્થાનં પ્રકીર્તિતમ્ ।
પશ્ચિમાભિમુખે લિઙ્ગે સ્થાનમેતદુદીરિતમ્ ॥ ૫૪॥

પ્રાઙ્મુખે શિવલિઙ્ગે તુ ચણ્ડસ્થાનં દ્વિજોત્તમ ।
ઈશાનભાગે વિજ્ઞેયભન્યત્ર તુ ન સર્વથા ॥ ૫૫॥

મહેશસ્યોત્તરં સ્થાનં સોમસૂત્રસ્થલં સ્મૃતમ્ ।
પૂર્વાભિમુખલિઙ્ગે તુ નિયમોઽયં પ્રકીર્તિતઃ ॥ ૫૬॥

પશ્ચિમાભિમુખે લિઙ્ગે સોમસૂત્રં શિવસ્ય તુ ।
પૂર્વસ્થાનં તુ વિજ્ઞેયમન્યત્ર તુ ન સર્વથા ॥ ૫૭॥

ત્રીણ્યેતાનિ સ્થલાન્યેવ નવ સ્થાનાનિ સત્તમ ।
એતેષ્વેવ ત્રિરાવૃત્ત્યા નવસ્થાનપ્રકલ્પનમ્ ॥ ૫૮॥

તેષ્વેવૈકૈકમાવૃત્ત્યા તાન્યેવાત્ર પુનઃ પુનઃ ।
યત્નેનાવર્તનીયાનિ નવતાં યાન્તિ તાન્યતઃ ॥ ૫૯॥

ઉપવિશ્ય વૃષસ્થાને સઙ્કલ્પ્ય વિધિપૂર્વકમ્ ।
કૃતાઞ્જલિપુટો મૌની ચણ્ડસ્થાનં વ્રજેત્તતઃ ॥ ૬૦॥

પુનર્વૃષેશમાગત્ય ચણ્ડસ્થાનં વ્રજેત્તતઃ ।
તતો વૃષેશમપ્રાપ્ય સોમસૂત્રં વ્રજેત્તતઃ ॥ ૬૧॥

સોમસૂત્રમનુલ્લઙ્ઘ્ય ચણ્ડસ્થાનાવૃષં વ્રજેત્ ।
સ્થાનાન્યેવં સમાવૃત્ય વૃષભેશં પુનર્યદા ॥ ૬૨॥

પ્રાપ્નુયાન્નિયતો ભૂત્વા તદેકં સ્યાત્પ્રદક્ષિણમ્ ।
સવ્યાપસવ્યરૂપેઽસ્મિન્ વૈદિકે તુ પ્રદક્ષિણે ॥ ૬૩॥

પ્રદક્ષિણવિધિઃ પ્રોક્તો જાબાલૈરયમેવ હિ ।
એવં પ્રદક્ષિણં કાર્યં પ્રત્યહં શઙ્કરાલયે ॥ ૬૪॥

યદ્યત્ર મોહાદ્વ્યત્યાસસ્તદા સ્યાદન્યથા ધ્રુવમ્ ।
દિવાસન્ધ્યાસુ કર્તવ્યમેવમેતત્પ્રદક્ષિણમ્ ॥ ૬૫॥

ઇદં પ્રદક્ષિણં નિત્યં દ્વિજમાત્રસ્ય સત્તમ ।
પ્રદક્ષિણત્રયં કાર્ય એકં પઞ્ચદશાથ વા ॥ ૬૬॥

અષ્ટૌ દ્વાદશ વા કાર્યાણ્યધિકાન્યપિ શક્તિતઃ ।
સવ્યં સવ્યેન કર્તવ્યં તદપિ શ્રુતિચોદિતમ્ ॥ ૬૭॥

તદપિ દ્વિજમાત્રસ્ય નિત્યમેવ ન સંશયઃ ।
શક્તૈસ્તુ સર્વદા કાર્યં સવ્યાસવ્યપ્રદક્ષિણમ્ ॥ ૬૮॥

ઇદં કાર્યં પ્રદોષેષુ શક્તિહીનૈરપિ દ્વિજ ।
સવ્યાસવ્યવિધાનેન પ્રદોષે શઙ્કરાલયે ॥ ૬૯॥

પ્રદક્ષિણત્રયં વાપિ કર્તવ્યં નિયમાદ્દ્વિજૈઃ ।
શિવાલયે તુ યઃ કુર્યાત્સવ્યાસવ્યપ્રદક્ષિણમ્ ॥ ૭૦॥

સ ફલં વાજપેયસ્ય સમ્પ્રાપ્નોતિ પદે પદે ।
કૃતાઞ્જલિપુટૈરેવ શિવધ્યાનપુરઃસરમ્ ॥ ૭૧॥

પ્રદક્ષિણં સદા કાર્યં મહાદેવાલયે દ્વિજ ।
અષ્ટાઙ્ગસહિતઃ કાર્યઃ પ્રણામઃ પાર્વતીપતેઃ ॥ ૭૨॥

સર્વકાલેષુ યત્નેન શિવધ્યાનપુરઃસરમ્ ।
જાનુબાહુશિરોવક્ષોગણ્ડાનામષ્ટકં યદા ॥ ૭૩॥

દણ્ડવત્પ્રણતાસક્તં તદષ્ટાઙ્ગનતિર્ભવેત્ ।
એતદષ્ટાઙ્ગ સંયુક્તાઃ પ્રણામાઃ પાર્વતીપતેઃ ॥ ૭૪॥

પ્રયત્નેનાન્વહં કાર્યાઃ સાવધાનં દ્વિજાતિભિઃ ।
પ્રણામાઃ પાર્વતીશસ્ય કર્તવ્યા એકવિંશતિઃ ॥ ૭૫॥

એકાદશાઽથવાષ્ટૌ વા નાતો ન્યૂનાઃ કદાચન ।
પ્રાતઃ શિવાર્ચનં કૃત્વા દશ કુર્યાત્પ્રદક્ષિણાઃ ॥ ૭૬॥

મધ્યાહ્ને દ્વાદશ સ્યુઃ સાયમેકાદશોદિતાઃ ।
સમુદ્ધૂલિતદેહેન મહાદેવપ્રદક્ષિણમ્ ॥ ૭૭॥

કર્તવ્યં નાતિવેગેન ધૃત્વા રુદ્રાક્ષમાલિકાઃ ।
સોમસૂત્રમનુલ્લઙ્ઘ્ય ગર્ભે કાર્યાઃ પ્રદક્ષિણાઃ ॥ ૭૮॥

વૃષો યદિ ભવેદ્ગર્ભે નો ચેત્તત્ર ન સર્વથા ।
સોમસૂત્રમનુલ્લઙ્ઘ્ય ગર્ભે સવૃષભેઽપિ ચ ॥ ૭૯॥

વિહિતં વાસ્ત્વવિહિતં સોમસૂત્રં ન લઙ્ઘયેત્ ।
બહિશ્ચાપિ હિ તં સૂત્રમુલ્લઙ્ઘય નૈવ સર્વથા ॥ ૮૦॥

મોહાદપિ તં સૂત્રમુલ્લઙ્ઘ્યાપ્નોતિ યાતનાઃ ।
ઉત્તરાભિમુખૈઃ કાર્યં શ્રીમહાદેવપૂજનમ્ ॥ ૮૧॥

પ્રાઙ્મુખેનાપિ વા કાર્યં શ્રીમહાદેવપૂજનમ્ ।
પશ્ચિમાભિમુખૈર્વાપિ કર્તવ્યં શિવપૂજનમ્ ॥ ૮૨॥

દક્ષિણાભિમુખૈર્મર્ત્યૈર્ન કર્તવ્યં શિવાર્ચનમ્ ॥ ૮૩॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે ઋષિ અગસ્ત્યપ્રોક્તં શિવલિઙ્ગપ્રદક્ષિણવિધ્યુપદેશં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । ઉગ્રાખ્યઃ સપ્તમાંશઃ । અધ્યાયઃ ૨૬ કુમ્ભઘોણમહિમાનુવર્ણનમ્ । ૫૦-૮૩ ॥

- .. shrIshivarahasyam . ugrAkhyaH saptamAMshaH . adhyAyaH 26 kumbhaghoNamahimAnuvarNa
. 50-83..

Notes:

Ṛṣi Agastya ઋષિ અગસ્ત્ય delivers Upadeśa ઉપદેશ (to Dvija દ્વિજ) about the two types of Śivaliṅga Pradakṣiṇā શિવલિઙ્ગ પ્રદક્ષિણા viz., Savyāpsavya સવ્યાપ્સવ્ય and Savya સવ્ય - especially mentioning about not crossing the Somasūtra સોમસૂત્ર.

Proofread by Ruma Dewan

*Rishi Agastyaproktam Shivalingapradakshinavidhyupadesham*

pdf was typeset on June 16, 2024

Please send corrections to *sanskrit@cheerful.com*